से·टी स्नात्वस्नादाचमनेस्मृतं इदमाचमनेतत्सौमिति केचित् समंत्रकमिति स्मृताः तत्रापमाणमाह बौधायनः पीत्वासूर्यश्चमा
१९ मन्युश्चेतिप्रातरिति भारद्वाजः आपःपुनंतुमध्याह्ने द्विजःआचमनेचरेत् इति सायमग्निश्चमेतिइत्युक्ताः ॐसूर्यश्चमाम
16 न्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्योरक्षंतां यद्रात्र्यापापमकार्षं मनसावाचा हस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तद
वलुंपतु यत्किंचिदुरितं मयि इदमहममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा अस्यार्थः सूर्यश्च पुनर्मे मन्युयज्ञश्च पुनर्मेमन्यु
पतयश्च इंद्रादयः पापेभ्यो ग्रहवियपातकेभ्यो मां रक्षंतां मन्यंते ज्ञायंते पूज्यंते देवाः स्वस्वरूपफलदातारो यजमानानां य
त्र समन्युर्यज्ञस्तस्मिन् अध्वरे मन्युकृतेभ्यो अज्ञादिसंयोगात् यामकीटादिहिंसाजनितपापेभ्यो मन्युपतयो रक्षंतां यद्वा म
न्युः क्रोधस्तज्जनितपापेभ्यो मां रक्षंतां येनाहमकार्यमकरवं तादृशो मन्युर्मेमाभूदिति भावः किंच यदहंकारात् रात्रौ म
नसावाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना शिश्नेन पापमकार्षं कृतवानस्मि तत्पापं रात्रिरवलुंपतु दूरीकरोतु तथा यत्किंचि
न्मयि विषये दुरितं आजन्मसंचितं पापं तदिदमममृतयोनौ विश्वस्वरूपेमोक्षकारिणि ज्योतिषि तेजः स्वरूपिणि सूर्ये हृदिप्र
काशमाने जुहोमि प्रक्षिपामि तदर्थं ममिमेचित्ते जल्पे स्वाहा मदीयवक्त्राग्नौ सुसम्यगाममेताहुतमस्तु मन्युर्देमेकृतो

ज्रुपीतसमरः यद्यपिशिष्टेनेत्यपोह्लितेन तथापि सर्वैर्विषयस्कंदमिविकल्प्यते इतिपाणिनिस्मृतेः स्थानेद्रनादेशोन
किंतस्तपोस्तपोभवेतीतिटस्थानेउादेशः डित्वाहिलोपेशिष्टाइतिरूपंराजेतिसमस्यर्थे तृतीयाराज्ञाविसर्थः प्रातस्सा
यमाचमनयोर्मध्येमध्याह्नाचमनमंत्रस्यपाठाद्देहलीदीपकन्यायेनापइति पदमभयत्रापियोज्यम् तेनायमर्थः भो
आपोयुष्मदाचमनेनसूर्येज्योतिषिसत्येज्योतिषिवपापेजुहोमि तेनाहंशुद्धोभवामिइत्यशुप्रार्थना इतिप्रातराचमनमंत्रा
र्थः अथसायमाचनमंत्रः ॐअग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतांयदह्नापापमकार्षंमनसावाचा
हस्ताभ्यांपद्भ्यामुदरेणशिश्नाअह्नस्तदवलुंपतु यत्किंचिद्दुरितंमयिइदमहममृतयोनौसत्येज्योतिषिजुहोमि
स्वाहा अस्यार्थः अग्निःसर्वव्यापीज्योतिःस्वरूपपरमात्मा अह्ना अहनि अहर्दिवाः सत्येसत्यस्वरूपेपरमात्मनिज्योति
षिसर्वव्यापिनिसत्येसर्वंप्रतिष्ठितमितिश्रुतेः शेषंप्रातराचमनमंत्रार्थवत् इतिसायमाचमनमंत्रार्थः अथमध्या
ह्नाचमनमंत्रः ॐआपःपुनंतुपृथिवींपृथ्वीपूतापुनातुमां पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां यदुच्छिष्टमभो
ज्यंयद्वादुश्चरितंममसर्वंपुनंतुमामापोऽसतांचप्रतिग्रहंस्वाहा अस्यार्थः भोआपोयूयंमलिनांरोपितांपृ
थिवींपुनंतुस्वास्थितेमांपवित्रीकरोतुचपुनः ब्रह्मणस्तेजसःपतिःस्वामिनेमांब्राह्मणरूपमापोयूयंपुनंतुचपुनः

से॰टी॰ १८

17

ब्रह्मजलेतेनपूता पृथिवीमांपुनातुमांपुनेतु ब्रह्मणस्पतिर्ब्रह्मपूतोपुनातुमांयदुच्छिष्टमभोज्यंचभोजनानंदुंप्रतिगृहीतं
यद्वादुश्चरितंममसायनेममममायिविषयेनत्सर्वंमावाप: पुनेतुचपुन: असतांप्रतिग्रहंग्रहितमयोग्यानांप्रतिग्रहंग्रहिताऽरेमांवा
प: पुनेतुस्पृष्टुग्राहयेतुपवित्रीकरणार्थमाचमनेक्रियते॰ नेनेति स्वाहा ब्रह्मणस्पतिरित्यत्रविभक्तेरलुक्सकारश्चनिपात
स्छान्दसत्वात् पुनेतितिवदुवचनेस्थानेछान्दसत्वात् ग्रुतयवब्रह्मपूतापुनातुमामिति भोज्यापस्त्वदाचमनेनाहंपूतोभवा
मीत्यस्याशार्थनाममेति सप्तम्यर्थेषष्ठीतेनमयीत्यर्थ: यद्वाब्रह्मपूतेत्यत्रब्रह्मेतिभिन्नंपदंपूतेतिभिन्नंच तापुतेनिर्मलेज्ञाने॰
स्वरूपेब्रह्मणोपुनातु लिंगव्यत्ययेनपूतमित्यस्यस्थानेपूतेतिस्त्रीलिंगनिर्देश: अतिमध्याह्नसंध्याचमनमंत्रार्थ: ततोमार्ज
नेकुर्यात् तथाव्यास: आपोहिष्ठात्रचै:कुर्यान्मार्जनंतुकुशोदकै: प्रणवेनतुसंयुक्तोक्षिपेद्वारिपदेपदे विप्रुषोष्टौक्षिपे
न्नूर्द्ध्वंअधोयस्यक्षयायच रजोतमोमोहजातान्जाग्रत्स्वप्नसुषुप्तिज वाङ्मन:कायजान्दोषान्नवैतान्नवभिर्दहेत् प्रजा॰
पति: ऋगंतेमार्जनेकुर्यात्पादांतेवासमाहित: अर्द्धर्चांतेथवाकुर्यान्मुनीनांमतमीदृशं तथाचाह ब्रह्मा धाराच्युतेन
तोयेनसंध्योपास्तिविगर्हिता पितरोनप्रसीदंतिनप्रसीदंतिदेवता कथंतर्हिकार्यमित्याह सपव नद्यांतीर्थेहृदेवापिभा॰
जनेवाथमृण्मये औदुंबरेथसौवर्णेराजतेदारुसंभवे कृत्वातुवामहस्तेवामार्जनंतुसमाचरेदिति यत्तु वामहस्तेजले

कृत्वायस्तुसंध्यामुपासते सासंध्यापूतहीलीलोकेयाश्रमहासैस्तत्तर्पिता इति तस्मात्सन्ध्यावेलामहत्त्वप्रतिकार्यं कात्यायनः
शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः प्रणवोभूर्भुवःस्वश्चगायत्रीचतृतीयका अब्दैवतैस्त्र्यृचैश्चैभिर्मार्जनंतुसमाचरेदि
ति कात्यायनोक्तमिदंमार्जनंतु सर्वसावित्र्याचरणसंध्याप्रारंभेशरीरशुद्ध्यर्थंवामार्जनमंत्रायथा ॐआपोहिष्ठामयोभुव
स्तानऊर्जेदधातन महेरणायचक्षसे ॐयोवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमाम
वो यस्यक्षयायजिन्वथ आपोजनयथाचनः इति अस्यैषामर्थः यद्यपिमंत्रास्त्रयस्तथापिनवपदात्मिका इतिवाक्यम्
विप्रषोष्टोपदिपंक्तिश्चपेयोयस्यक्षयायच इत्यौदाहृतेव्यासवाक्यात् भोआपोयूयंहीतिनिश्चिते भुवःशब्दयोहामयास्थि
राभवेत्तु ताआपोनोऽस्मान्ऊर्जेअन्नयतेजसेभविदधातनस्थापतअन्नयतेजोयुक्तान्अस्मान्कुर्वंतित्यर्थः किंचमहे म
हतेरणायरमणीयायचक्षसेदर्शनायदधातनेतिशिविभावात्त्वस्मयोगात्तस्मालोपोनमहे इतिमहतेरत्नस्यस्थानेहका
रस्यछांदसत्वात् लोपेमहे इतिरूपेचक्षसे इत्यस्यस्थानेउकारस्यस्थानेअकारेकृतेषस्थानेसत्वेचकृतेचक्षसेइतिरू
पेयोवइतिभोआपोवःशिवतमोऽतिशिवेनकल्याणरूपोरसस्तस्यहलोकेनोऽस्मान्भाजयेतभागिनःकुर्वंतःरसभो
क्तॄनस्मान्कुरुतेत्यर्थः किंभूताःयूयमातरइव उशतीरिच्छंत्यः यथामातरः स्नेहयुक्ताःपुत्रान्स्तनादिनापोषयंति तथा

तेनरसेनास्मान्यूयंपोषयथ तस्मादिति भोआपोवोयुष्माकंतस्मैतस्मिन्रसेअरंगमामगच्छाम अरलंमंमे·
मं॰टी॰ कार्थवाचकोमावर्ण्येरलयोश्चैवग्राशयोवचयोस्तथा वदंयेषांचसावर्ण्येमलेकारविदोजनाः इतिवचनात् उशतीरितिव
१८ शाकोतावित्यस्मात्कंसदयत्ययेसंचमारणेपूर्वेरूपेचकृतेपथमावदृववनस्थानेइमम् तस्मैइतिसम्रम्यर्थेचतव्धीयस्येतियस्य
क्षयायभोगाययूयंजिन्वथ तृमावचभविष्य तस्यरसस्यविषयेवयंतृप्तिंगच्छामः इत्यस्यप्रार्थना हलाष्युपनिर्वेयेतआ
यस्यक्षयायक्षयस्यस्थानस्यब्रह्मादिस्तंभपर्यंतस्यजगतोयूयंजिन्वथ तस्यरसस्यक्षयायप्राप्त्यैनोऽस्मान्जनयथ
जीविप्रीणनेइत्यस्यधातोलण्मध्यमपुरुषैकवचनेतस्यरूपे आपोयस्यरसस्यक्षयाययूयंप्रीणयथः तद्रसेनोऽस्मा
केपरिकल्पयतेत्यस्यप्रार्थना योगीश्वरः आपः पुण्याः समादायत्रिःपठेद्द्रुपदामृच ततोयमस्त्रिविन्यस्यसर्वपा
पैःप्रमुच्यते मंत्रोयथा ओंद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव पूतंपवित्रेणेवाज्यमापः शुंधंतुमै
नसः इत्यस्यार्थः भोआपोयूयंमांमामेनसःपापेभ्यःशुंधंतुपवित्रीकुर्वंतु यथाद्रुपदाहृदामलात्स्विन्नःचमो
पहृतःपुरुषोमुमुचानःछेदंत्यक्तवान् यथाचस्नातःपुमान्मलात्पूतोभवति यथावाज्यंघृतंपवित्रेणसाग्रकु
शपत्रद्वयेनप्रोक्षितंघृतंभवति तथामांयूयंशुंधंतु अथवा उर्हंतः मपदंस्थानेयस्यसद्रुपदोवहिर्हेन्वाद्बहिर्जाय

18

त इतिवचनात् यथाबह्वृचः स्विन्नोवहिस्नाननैवतत्क्षचर्मस्नयायस्येमांपापेभ्यः शुद्धंकुर्वैतित्पर्थः इवशाखोयथार्थे यनसइति
जातावेकवचनेनेनाखिलपापेभ्यरितित्रेयेमर्वपापैःप्रमुच्यते इतिसर्वोदाहृतयोगीश्वरवचनात् अथैतस्यफलमाह परा
शरः द्रुपदानाम गायत्रीवेदवाजसनेयकेअन्तर्जलेत्रिरावर्त्यसव्यतेअपस्यहृत्येत्यादिग्रंथविस्तरान्नोच्यते इतिमार्जनमेवार्थः
ततोजलेनासायोमयोज्यऋतंचेतिपठित्वातत्जलेतदालिनोत्क्षिपेत् छंदोगपरिशिष्टे करेणोद्धृत्यसलिलंघ्राणमास
ज्यतत्रच जपेदनायतासुर्वीःत्रिःसकृद्वाघमर्षणमिति वायदेनायतासुर्वैतिवोद्धव्ये ऋतंचेत्यस्यव्याख्यानेसंध्याप्रारंभावम
नेकथितमेव तथैतस्याद्भुतमाह हारीतः महापातकातिपातकोपपातकानामेकतमेमेनिपातवाघमर्षणमेवत्रिर्जपेत्
इतिसुमेतयाज्ञवल्क्यो त्रिरात्रोपोषितोभूत्वाब्रह्महात्वघमर्षणे अन्तर्जलेत्रिरावर्त्यदयाज्ञोवपयस्विनी मातरंभगिनीस्वसा
रंस्नुषांसुतांसमनाभ्योगुरुतल्पंगत्वाशूद्रागमनेचकृत्वाघमर्षणमन्तर्जलेत्रिरावर्त्यसर्वस्मादेनसःपूतोभवतीति तथादेवाहि
जन् गुरून्हत्वाअप्सुनिमज्यमानोघमर्षणंसकृत्त्रिरावर्तयदिति यमः महापातककर्माणश्चत्वारोविविशेषतः अग्निंप्रविश्य
शुध्यंतिस्थानामहतिसत्रेनैरहस्यकरणेचैवमासमभ्यस्यपौरुषे अघमर्षणसूक्तेवामध्येतजलेस्थित इति अघमर्षण
नेतरमेतश्चरसीत्याचामेत् मंत्रोयथा ॐअंतश्चरसिभूतेषुगुहायांविश्वतोमुखस्त्वंयज्ञस्त्वंवषट्कारस्त्वमापोज्योतिरसोमृ

ते इतिश्रुत्यर्थः भोग्यापन्नममृतं पुनर्जन्माद्यभावरूपमसि यद्वा नश्चियते प्राणत्यागो न भवति यस्मात्तदमृतं प्राणा
सं॰दी॰ नोऽपद्यप्रदमसि अत एव ज्योतिः प्रकाशरूपोऽत एव रसोऽब्रह्मस्वरूपमसि अत एव भूतेषु प्राणिमात्रेषु स्थावरजंगमात्मकेषु
१५ अंतरमध्ये चरसि गमरूपेण आत्मतादात्म्यापने करोषि प्राणावमानेषु तेषु अंतश्चरसि भूतानि चरगतिभक्षणयोरिति स्मरणा
त् अत एव गुहायां संसारे विश्वतोमुखविश्वस्य अवकाशरूपोऽत एव त्वं यज्ञो यज्ञकार्यकर्तारो विना यज्ञप्रवृत्तेरसंभावात् यद्वा
यज्ञो विष्णुस्वरूपो यज्ञो वै विष्णुरिति श्रुतेः अश्वग्रीहृदये सूर्ये स्थंडिले प्रतिमासु च नित्यपूजा हरेः कार्या सर्वसिद्धिमभीप्सुभि
रिति स्मृतेश्च अत एव त्वं वषट्कारो यजमानरूपोऽसि सर्वेषां प्राणादिदातृत्वात् तत्त्वदाचमनेनाहमप्यमृतादिभोक्ता भवामीत्य
स्य प्रार्थना अप इति अपस्शब्दस्य संतस्याः सर्वस्यरूपे विश्वत इति सर्वविभक्तिकत्वात्सिल्प्रत्ययः अर्घ्यमर्घणानंतरं सूर्या
यार्घं दद्यात् तत्र प्रातः सायं च त्रिर्मध्याह्ने सकृत् तथा च व्यासः गायत्र्या जलमादाय त्रिरूर्ध्वं संध्ययोः क्षिपेत् मध्याह्ने
तु सकृद्देयं देयं पाणिर्येर्द्विजातिभिरिति यत्तु श्रीदत्तेनोक्तं उक्ताया अर्कं प्रति विप्रो हि त्रिकोणांजलिना सकृत् इति कात्यायन
वचनमाश्रित्य संध्यात्रयेप्येकमेवार्घ्यदानमिममर्घ्यदानमिति तन्मध्याह्नसंध्याविषये कात्यायनेन मध्याह्नस्नानानंतरमेत
स्सालिखितादिति ततः सूर्यं प्रदक्षिणं कुर्यात् तथा च तैत्तिरीयश्रुतिः ब्रह्मवादिनः सूर्यं मत्वा संध्यायां गायत्र्याभिमंत्र

19

५

ताश्यांपञ्चधेमतल्लिप्तेनाध्यायीवज्जीभूतास्मानिरस्तोस्मिमंदेहरुणङ्घयेप्रादिपेति एतस्मादादित्यणेप्रकामेति तेनपाश्वानम
वधुन्वेस्मानिरस्तोसीति उद्यंतमस्तंयांतमादित्यमभिध्यायन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुत इति एतच्छ्रुतेरर्थंस्तु
स्पष्टार्थः कश्यपः भूशक्त्यामहावीर्यामंदेहानामराक्षसाः कस्मानिदारुणाघोरासूर्यमिच्छंतिखादितुं ततोदेवगः
णाः सर्वेऋषयश्चतपोधनाः उपासंतेमहासंध्यांप्रक्षिपंत्युदकांजलिं दह्यंतेतेनतेदैत्यावज्रीभूतेनवारिणा एतस्मात्का
रणाद्विप्राःसंध्यांनित्यमुपासते इति ततःसूर्यंध्यायन्नुपतिष्ठेत् तथाचकूर्मपुराणे अथोपतिष्ठेदादित्यमुदयंतंसमाः
हितः मंत्रैस्तुविविधैःसौरैः ऋग्यजुःसामसंभवैरिति वशिष्ठः प्रक्षिप्यचांजलिंसम्यगुद्धेत्यत्रमित्यपि तद्वन्तदेव
इतिवहेसः शुचिषदिति अपिरात्रजपेद्दृहंवाङ्ः सूर्यंपश्यन्समाहितइति तथागायत्रींतुयथाशक्ति उपस्थायदिवाकरंइति
उदुत्यंचाहुरितिमध्याह्नसंध्याविषयानाउदुत्यमित्यादयोमंत्रामध्याह्नसंध्याविषयमेवेति केचित् मित्रस्यचर्षणीधृत इ
त्योवमस्यस्तेचोदयेत् इमंमेवतिचतक्षणस्मायोक्तयांउपस्थितमिति देवलोकः तदेतच्चाखेवांतरीयेवासेनसंध्यात्र
येप्येकमेवोपस्थानमिति उदुत्यमित्यादिमंत्राश्चेतिकथनात् तथाहि संध्यात्रयेप्येकमेवस्तुपस्थानेप्रवर्तते उदु
यमुदित्येचित्रंतत्वद्वातिष्ठेद्वाकरमिति कश्यपः हस्ताभ्यांस्वस्तिकेकृत्वाप्रांजलितिष्ठेद्दिवाकरं मध्याह्नेतत्स्त्वबाहु

से.टी.
२०

20

मायेमकुलितोकरावित्ति अथोपस्थानमंत्राः ॐउद्वयंतमसस्परिस्वःपश्यन्तः उत्तरम् देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम् ॐ
उदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यम् ॐचित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्या
वापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च ॐतच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजीवेम
शरदःशतंशृणुयामशरदःशतंप्रब्रवामशरदःशतमदीनाःस्यामशरदःशतंभूयश्चशरदःशतात् सूर्यंवयमुदगान्म
इत्याम उदितेसतिसदसदेहलीदीपकन्यायेनोयत्रान्वयः किंभूतेसूर्ये तमसोमायारूपसंसारोडपरिवर्तितइतिशेषः पु
नःकिंभूतेस्वःस्वर्गलोकेउत्तरेतारणरूपे उत्प्लवनतारणयोरितिधातुनिर्देशात् पुनःकिंभूतेदेवेप्रकाशस्वरूपे ज्योतिरुत्त
मे ज्योतिषामित्यादीनांमध्येउत्तममुत्कृष्टंज्योतिषांरविरंशुमान् इतिभारतोक्तेः कथंभूताः केनवादेवत्रादेवानिंद्रादीन्
त्रायंतेरक्षंतेइतिदेवत्राः देवास्त्रायंतेहव्यादाराजगणैः केनाभिःस्तेदेवत्राइतिवाआदित्याजायंतेहविर्हविषःहविरन्नेप्रजायतइतिस्मृ
तेः पुनःकिंभूताः केतवःसूर्यपश्यंतस्तईशानेस्थिताः सततंसदानामादायहव्यादिकुर्वंतइत्यर्थः किंभूतावयंसूर्यंपश्यंतःकिं
भूतंसूर्यमडत्यमूर्ध्वमुत्तमसातत्यगामिनं अतसातत्यगमनेइत्यस्यव्ह्वेदोनियातनादकारस्यानेउकारः अत्यामितिअदनेन
रेणामितिइत्यर्थः पुनःकिंभूतंसूर्यंजातवेदसंहिरण्यस्वरूपंआग्निस्वरूपंवा हिरण्मयोयंपुरुषःइत्यादिश्रुतेः किंभूतःसूर्योदे

तो चित्रं ज्ञानस्वरूपमाश्चर्यकरं वेदागाउदयं प्राप्तव देवादिभिरपि तत्स्वरूपानुपलब्धेः चित्रं संज्ञाने इत्यस्य चित्रमिति रूपं पुनः
किंभूतो देवानां कान्तीनामनीकं समूहः पुनः किंभूतो मित्रस्य मित्राणां द्वादशादित्यानां वरुणस्याग्नेश्च चक्षुः प्रकाशकं चक्षोः
सूर्यो जायते इति श्रुतेः मित्रस्येति जातावेकवचनं पुनः किंभूतः सूर्यो द्यावापृथिवी अन्तरिक्षं स्वर्गं मर्त्याकाशमाप्रा रश्म्यादिद्वारा
पूरितवान् आप्रा इति आङ्पूर्वकप्रापूरणे इत्यस्य लङि पूर्वकप्रापूरणे इत्यस्य लङि छान्दसत्वाल्लुकि सस्य रुत्वेऽपि तेन वक्रते आप्रा इति
सिद्धे आप्रा द्यावा इत्यत्र विसर्गस्य सन्ते रुत्वे यत्वे यलोपे वक्रते रूपे अन्तरिक्षं इत्यत्रानुस्वारस्य छंभाव छान्दसत्वात् शरदः शतं छे
इत्यत्राप्येवं हलायुधपतिर्वेचेन आप्रा इत्याङ्पूर्वकप्रापूरणे इत्यस्य तङ् प्रथमैकवचनस्थाने डातिडोभवेति इति मध्यमपुरुषैकवच
नेइति पुनः किंभूतः सूर्यो जगतः जंगमस्य च पुनः तस्थुषः स्थावरस्यात्मा व्यापकः स्थावरजंगमात्मकजगत्त्रये इत्यर्थः तत्प्रसि
द्धं पूर्वोक्तमादित्यबिम्बं चक्षुस्त्रैलोक्यप्रकाशभूतं यथा चक्षुषा विना वस्तु चक्षुषा ज्ञानेन प्रकाशयति तथानेनापि विना जगन्न प्र
काशते किंभूते तच्चक्षुर्देवहितं देवादीनां हितं वोक्ति अन्नदिने वा नामपि कर्म न कुर्वन्ति किं कुर्वे तच्चक्षुः पुरस्तात्पूर्वस्
स्यां दिशि शुक्रं वीर्यं सृष्ट्युत्पादनसमर्थमुच्चरेत् यजेत् यद्वा शुक्रं शुक्लं निष्पापं रत्नयोः सावर्ण्यात् पुरस्तात्प्राच्यां दिशि मुच्चरत् उद
येन गच्छत् उदयं देति तच्चक्षुषो विशेषणे तो शरदः शतं वर्षाणां शतं पश्येम दर्शयामः च पुनः शतमदीनाः धनाढ्याः स्याम ॥

चपुनःशदःशतंवर्षाणांशतंपश्येमःदर्शयामः चपुनःशतमदीनायनाश्याम् भूयःपुनरपिकृर्षमेवभवामः इत्यस्माकं
सं॰टी॰ प्रार्थनावाक्यमितिमंत्रार्थः सामशक्तिरूपमसमभवीतिध्यातोः अथानंतरं गायत्रीध्यानमेवमाह व्यासः तेजोसीतिवमंत्रे
२१ णगायत्रीमावाहद्द्विजः उपस्थायतुरीयेणनमस्कृत्यजपेत्ततो अस्यार्थः तेजोसीतिमंत्रेणगायत्र्याआवाहनेगायत्र्यस्येकप
दीतिमंत्रोत्थानतथः ततोनमस्कृत्यगायत्रींजपेत् शारदातिलकेतुप्रकारांतरेणध्यानमुक्तं यथा मुक्ताविद्रुमहेमनील
धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वार्थवर्णात्मिकांगायत्रींवरदाभयांकुशकशाःशुभ्रंकपालंगुणं
शंखंचक्रमथारविंदयुगलंहस्तैर्वहंतींभजे मंत्रोयथा ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेव
यजनमसि इति अस्यार्थः हेगायत्रिदेवित्वंतेजःप्रकाशरूपातमोनाशकत्वमसिप्रकाशेनतमसोनादर्शनात् हेदेवित्वंशु
क्रंवीर्यंधर्मादीनामुत्पादिकासि हेदेवित्वममृतममृतरूपासित्वज्जपरसपानतोहेकृतार्थोभविष्यामि इत्यर्थः हेदेविना
मइतिप्रसिद्धंधामचतत्देशलोकानांनिवासस्थानमसि त्वयिसर्वेलयंयांतिततःसर्वेप्रवर्तंते इतिपुराणवाक्यात् अतएव
ववेदानांब्राह्मणादीनांप्रियंप्रेमित्रे अतएवानाधृष्टंब्रह्मादिभिरपितत्स्वरूपेचिंतयितुमशक्यंपरमात्मस्वरूपत्वादतएवस्व
रूपवाक्यार्थः उपस्थानेमंत्रोयथा गायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसेनमस्तेतुरीयायदर्शताय

व्याख्याप्रसंगे गायत्रीशिरोमंत्रोपि व्याख्यायते प्राणायामप्रकरणे तत्सवितुरिति पाठात् शिरोमंत्रो यथा ॐ आपो ज्यो
तिरसोमृतं ब्रह्म भूर्भुवः स्वरोमिति अस्यार्थः भो आपस्त्वं ज्योतिः प्रकाशरूपोसि अत एव रसोमृतं च रसश्च रसोमृता
स्वादुरूपो अत एवामृतं तत्पानं श्रेयसो भवतीति अमृतमेतज्जलानां अत एव ब्रह्म ब्रह्मद्धिकारकं अत एव भूर्भुवः स्वरिति
लोकत्रयात्मा ॐ रक्षक इत्यर्थः अथ जपविधिः तत्र शंखः कुशहस्तः समासीनः कुशोत्तरीयो वा कुशपवित्रपाणिः
प्राङ्मुख उदङ्मुखो वा सूर्याभिमुखो वा अक्षमालामादाय देवतां ध्यायन् जपं कुर्यादिति कुशहस्तो कुशासने हि तत्रा मासने
त्विषीति को ब्रूयात् आपस्तंबः दर्भेष्वासीनो दर्भान् धार्यमाणः सोदकेन पाणिना प्राङ्मुखः सावित्रीं सहस्रकृत्व आवर्त
येत् शतकृत्वो वा परिमितकृत्वो वेति अपरिमितकृत इत्यनेन यद्यपि संख्यानियमो नेति गम्यते तथापि दशकृत इत्य
र्थो न संख्येयः सहस्रपरमामिति वक्ष्यमाणवचनात् तथा वामसंख्यातं यज्जप्तं तत्सर्वं निष्फलं भवेत् इत्यसंख्यातजपस्य
निष्फलत्वश्रुतेः रहस्यजपेपि वेदपाठजन्यफलमाह मनुः एतदक्षरमेतां च जपेद्व्याहृतिपूर्विकां संध्ययोरुभयो
र्विप्रो वेदपुण्येन युज्यते इति जपन्नासीत सावित्रीं प्रत्यगा तारकोदयात् संध्यां प्राक् प्रातरेवं हि तिष्ठेदा सूर्यदर्शनात्
इति योगीश्वरवाक्ये संध्यांगभूतदीर्घजपार्थं मध्याह्नसंध्यायामपि तिष्ठेच्छ्रेष्ठो दश माणोके जपं कुर्यात्समाहितः अथवा

षात्मकमित्यर्थः अथ गायत्रीजपस्वरूपः तत्र व्यासः प्रणवव्याहृतियुतां गायत्रीं च जपेत्सते इति चकारेणापि प्रणवं
से·टी· दत्त्वा जपेदिति ज्ञायते तथा च योगीश्वरः ओंकारः सर्वमन्त्राणां भूर्भुवःस्वस्तथैव च गायत्री प्रणवश्चैते जपथषडुदाहृ
२२ तः बौधायनः उभयतः सप्रणवां सव्याहृतिकां जपेदिति तत्स्वयं यथावदेव ज्ञातव्यं अथ गायत्रीव्याख्यातः वेदादिप्र
सिद्धं भूरादिसप्तलोकप्रकाशकमग्निवचनीयं सवितृजगदुत्पत्त्यादिकर्तुः परब्रह्मस्वरूपस्य भर्गस्तेजोमूलाविद्यादाहक
भेदेन परब्रह्मसंयोगकर्तृ वरेण्यं धीमहि ध्यायेम यो भर्गो नोऽस्माकं धियोऽन्तःकरणवृत्तीः प्रचोदयात् प्रेरयति भेदभिन्न
धियामस्माकमात्मसाक्षात्कारेणाविद्यानाशपूर्वकं मुक्तिमार्गेऽस्मान्प्रेरयतीति भावः किंभूतस्य सवितुः देवस्य स
र्गस्थितिप्रलयैः क्रीडनकर्तुः किंभूतं भर्गो वरेण्यं सर्ववरणीयं स्तुत्यमित्यर्थः सूयते जगदस्मादिति सविता षूङ् प्र
सवे इत्यस्मात्तृच् प्रत्यये इडागमे कृते प्रथमैकवचने सवितेति रूपं तस्य सवितुः वृङ् संभक्तावस्मादनीयर् वरणीयमिति रू
पं तस्य स्थाने छान्दसत्वाद्वरेण्यमिति रूपं अज्ञानरूपामविद्यां नाशयतीति भर्गो निरेतं परब्रह्मस्वरूपे स्मरमाणो योजयतीत्य
र्थः दिव क्रीडादौ इत्यस्य देव इति रूपं तस्येत्यर्थः ध्यै चिन्तायामित्यस्य लिङि धीमहि इति रूपं छान्दसत्वात्सम्प्रसारणं दि
ग्मात्रमेतत् गायत्रीप्रशंसा यो प्राणायामप्रकरणे योगियाज्ञवल्क्यपराशरादिवाक्यैः पूर्वमस्माभिः कथिता अथ गायत्री

व्याख्याप्रसंगेगायत्रीशिरोमंत्रोपिव्याख्यायते प्राणायामप्रकरणेतस्यापित्रिरितिपाठात् शिरोमंत्रोयथा ॐआपोज्यो
तीरसोमृतंब्रह्मभूर्भुवःस्वरोमिति अस्यार्थः भोआपस्त्वंज्योतिप्रकाशरूपोसि अतएवरसोमृतंचरसस्त्वरसोमृता
स्वादुरूपोअतएवामृतंतत्पानश्चेवमोभवतीति अमृतमेतज्जलानांअतएवब्रह्मरूपःहृद्धिकारकेअतएवभूर्भुवःस्वरिति
लोकत्रयाणांडौरत्नक इत्यर्थः अथजपविधिः तत्रशंखः कुशहस्तासमासीनाः कुशोत्तरीयोवाकुशपवित्रपाणिः
प्रागुदङ्मुखः सूर्याभिमुखोवा अक्षमालामादायदेवतांध्यायन्जपंकुर्य्यादिति कुशहस्तोकुशासनेहतनामासने
हर्षीतिकोशप्रात् आपस्तंबः दर्भेष्वासीनादर्भान्धार्य्यमाणःसोदकेनपाणिनाप्राङ्मुखःसावित्रीसहस्रकृत्वआवर्त्त
येत् शतकृत्वोवापरिमितकृत्वोवेति अपरिमितकृत्वइत्यनेनयद्यपिसंख्यानियमोनेतिगम्यते तथापिदशकृत्वइत्य
र्थोनसंग्राह्यः सहस्रपरमामितिवक्ष्यमाणवचनात्तथवासंख्यातयज्ञंतत्सर्वंनिष्फलंभवेत् इत्यसंख्यातजपस्य
निष्फलत्वश्रुतेः स्मृतिजपेपिवेदपाठजन्यफलमाह मनुः यत्तदक्षरमेतेतांतजपेद्व्याहृतिपूर्विकां संध्ययोरुभयो
र्विप्रोवेदपुण्येनयुज्यतेइति जपन्नासीतसावित्रीप्रत्यगातारकोदयात् संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्य्यदर्शनात्
इति योगीश्वरवाक्ये संध्यांगमस्तदीर्घजपार्थमथाहसंध्यायामपितिष्ठन्नेदीदस्माणोकेजपंकुर्य्यात्समाहितः अथवा

मे॰टी॰
२३

23

प्राङ्मुखः कुर्याद्दक्षमाणक्रमेण तु इति योगीश्वरवचनादासीनश्चैत्सर्वाभिमुखएव जपं कुर्यात् तथा च मध्यमे ध्यामा
सीनः प्राङ्मुखो जपेदिति पुराणवाक्यात् जपसंख्यामाह मनुः ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् वाणप्र
स्थो यतिश्चैव द्विसहस्राधिकं जपेत् व्यासः सायंप्रातश्च मध्याह्ने सावित्रीं वाग्यतो जपेत् सहस्रपरमां देवीं शतमध्यां
दशावरां गायत्रीं संस्मरेद्धीमान् हृदि वा सूर्यमंडले इति दशावरामित्युक्तेः दशभिर्न्यूनानां जपो भवतीति प्रयते गायत्रीं जपन्
संस्मरेदित्यर्थः शौनकः कृतोत्तानकरौ प्रातः सायं वाधोमुखौ ततः मध्ये स्कंदकरौ भ्योतु जप एवं उदाहृत इति यमः
सहस्रपरमां देवीं शतमध्यां दशावरां गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशनीं व्यासः अष्टोत्तरशतं नित्यमष्टाविंशति
मेव च विधिना दशकं वापि त्रिकाले तु जपेद्बुधः इति अपिशब्देन सकृदपि जपेदिति गम्यते तथा समाहृत्यानाना तेषां द
शाभिः प्राप्नुयाद्दिवं विंशाहृत्या तु सा देवी नयते परमे पदे अष्टोत्तरशते जप्ता तारयेज्जन्मसागरात् सर्वेषां चैव पापानां सं
करे समुपस्थिते दशसाहस्रकोऽभ्यासो गायत्र्याः शोधने परं न गायत्र्याः समो मंत्रो न जपो वेदकात्परः न वासुदेवात्प
रो देवः इति व्यासो ब्रवीत् वयं वायुभक्ष्यो दिने तिष्ठन् रात्रीं नीत्वाप्सु सूर्यदृक् जप्त्वा सहस्रं गायत्र्याः शुद्धेद्ब्रह्मवधादृते
इति तथा दशकृत्वः प्रजप्ता सा अह्ना यत्कृतं लघु तत्पापं प्रणुदत्याशु नात्र कार्या विचारणा शतं जप्ता तु सा महापात

कृतनाशनी कोटिजप्येन गायत्र्या यदीच्छति तदाप्नुयात् मनुः सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः महतोऽभ्यासयोगे
नत्वचेवाहिर्विमुच्यते योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः सब्रह्मपरमभ्येति मूर्तिमांस्त्रिवपावकः एतत्त्रिकं
प्रणवव्याहृतिसावित्रीतित्रिकमित्यर्थः एतां गायत्रीं प्रणवव्याहृतियुक्तामित्यर्थः यमः न तथा वेदजप्येन पापं निर्दह
ति द्विजः यथा सावित्रीजप्येन सर्वपापैः प्रमुच्यते न गायत्र्याः परं जप्यं न गायत्र्याः परं तपः न गायत्र्याः परं ध्यानं न गायत्र्या
परं व्रतं हारीतः सावित्रीजपतः पापेभ्यो विमुच्यते शते जप्ता मानसात्पूतो भवति सहस्रं जप्ता वाक्कृतात्पूतो भवति दशस
हस्रे जप्ता कायकृतात्पापेभ्यो मुक्तो भवति लक्षे जप्ता यदिच्छति तदाप्नोति काम्यजप्ये देशमाह योगीश्वरः अरण्ये गोष्ठे जला
न्ते वा जपेद्देवालये पि वा पुण्यतीर्थे गवां गोष्ठे सिद्धक्षेत्रे गृहेऽथवा एषां तारतम्यमाह शङ्खः गृहे त्वेकगुणं जप्यं
पादौ द्विगुणमुच्यते गवां गोष्ठे द्विगुणं अग्न्यागारे शताधिकं सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ गुह्यकाः राक्षसाः सि
द्धाः हरन्ति प्रसभं यतः सहस्रं शतकोटीनामनन्तं विष्णुसन्निधौ एकान्ते च शुभे देशे जपन्ते न वक्रमेन च हस्तपार्श्वमवलोकय
न् उपाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा न पदा पदमाक्रम्य न चैव हि तथा करौ न चासमाहितमना न च संश्रावयन् ज
पेत् अपाश्रितः आसनरहितः बृहस्पतिः न क्लिन्नवासाः स्थलगो जपादीन्नाचरेद्द्विजः कृतार्द्रेन नादेवासा नैकवासाः

सं॰टी
२४

समाहृतिः नजीर्णेनमलिनेनपरिक्लिष्टेनवाजपेत् व्यासः जपेकालेनभाषेत व्रतमोहादिकेषुच एतेषर्थेषामन्वेषुयथा
गच्छेद्द्विजोत्तमः अभिवाद्यततःविप्रं योगक्षेमंचकीर्तयेत् तस्मात्मासीनयाश्चोडवोशलपतितादिकान् दृष्ट्वातान्वाप्युप
स्पृश्यभाष्यस्नातात्पुनर्जपेत् इतियदातुजपादिषुमौनलोपस्तदाविस्मृतेत्रपठनेविस्मृतस्मरणेवाकार्यं तथाचयोगियाज्ञ
वल्क्यः यदिवागयमलोपःस्याज्जपादिषुकथंचन व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं गौतमः गच्छतस्तिष्ठतोवापि
स्वेच्छयाकर्मकुर्वतः अशुचेर्वाविनामंत्रात्तत्सर्वंनिष्फलंभवेत् क्रोधेलोभेक्षुतेनिद्रानिष्ठीवनविजृम्भणे दर्शनेचम्ले
नीचानांवर्जयेज्जपकर्माणि एतानिनिमित्तेसंभवेप्रायश्चित्तमाह मणवश्चाचामेत् संभवेचेषांस्मरेद्विष्णुंसुरार्चितं ज्योती
षिचप्रपश्येत्कुर्याद्वाप्राणसंयमं अनलेनगात्रविप्रोयतीन्वापिविशुद्धेयेइति प्राणसंयमेप्राणायामे अग्रियोद्विजाति
स्तज्जातिश्रेष्ठानपश्येदितिशेषः योगीश्वरः आर्द्रवासाश्चयःकुर्याज्जपहोमप्रतिग्रहं सर्वंतद्राक्षसंविद्याद्द्विजोन्नुचयत्कृते
बौधायनः कषायवासाःकुरुतेजपहोमप्रतिग्रहं नतद्देवानगमंभवेद्धव्यकव्यमथोहविः वशिष्ठः जपहोमोपवासे
षुधौतवस्त्रधरोभवेत् अलंकृतःशुद्धवासाःशुद्धात्मविजितेन्द्रियः हारीतः जपहोमेतथादानेस्वाध्यायेपितृतर्पणे धा
रयिताश्मदेवास्तुः सुवर्णरजतैःकुशैः चित्तोदर्भाःपथिदर्भाःयेदर्भायज्ञभूमिषु तेदर्भानिष्फलाःतस्मात्तान्सर्वान्स्य

रिवर्जयेत् पिंडार्थे ये स्तृता दर्भा ये तु कृते पितृकर्मणि सर्वेषामपि दर्भाणां तेषां त्यागो विधीयते नीवीमध्ये च ये दर्भाः ब्रह्मसू
त्रे च ये स्थिताः पवित्राणि तथा सर्वे यथा कायस्तथा कुशाः हस्ते हेतिः मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनं अव्यग्रत्वम
निर्वेदो जपसंपत्तिहेतवः इति आसने ब्रह्मितो जपं कुर्यादिति यदुक्तं तदर्थमासनान्याह व्यासः कौशेयं कंबलं चैव अजि
नं पदमेव च दारुजं तालपत्रं च आसनं परिकल्पयेदिति तथा कृष्णाजिने ज्ञानमोक्षः श्रीर्भवेत् व्याघ्रचर्मणि वशाजिते
व्याधिनाशः सर्वेष्टं चित्रकंबले इति वशावेव्यासाच प्रकृतत्वान्मृगी बाह्मीणां दुःखसंभवो वो ध्यावर्ज्यान्यासनान्याह स
पव च आसने चदारिद्र्यं पाषाणे व्याधिसंभवः धरण्यां दुःखसंभूतिर्दौर्भाग्यं छिद्रदारुजे तृणे धनयशोहानिः पल्लवे चित्त
वं यनैतृणवात्रकुशव्यतिरिक्तं कुशाहृष्याकुशेनरायोपाठेति ग्रवंशाद्योकृतत्वात् पल्लवे अंकुरितपत्रे ते नवालपत्रेति
षयः जपस्त्रिविधः तथा च नारसिंहपुराणे त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधमे वाचिकश्च उपांशुश्च मानसश्च त्रि
धा मतः त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरं इति बृहस्पतिः विधियज्ञाज्जपयज्ञो वा विशिष्टो दशभिर्गुणैः उपांशु
स्याच्छतगुणः सहस्रो मानसः स्मृतः वाशिष्टः पुनः शांतिको जप्य उपांशु पौष्टिकः स्मृतः सशब्दश्चाभिचारः स्या
त्रिविधो जप उच्यते मनुः जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते अथ वावि

कादीनां लक्षणानि नरसिंहपुराणे यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः मंत्रमुच्चारयेद्व्यक्तं वाचिको जपः स्मृतः शनैरुच्चार
सं॰टी॰ येन्मंत्रमीषदोष्ठौ प्रचालयन् किंचिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं शब्दार्थ
२५ चिंतनाभ्यासः स उक्तो मानसो जपः इति बृहस्पतिः विनाशब्दं यस्तु जपस्फुलतिको द्विजच्छंदः उपांशुं तं जपं प्राहुर्मनसा मान
25 सं जपः इति द्विजच्छंदः श्रोत्रः दैवतारतम्यमाह विश्वामित्रः उत्तमे मानसे जप्ये उपांशु मध्यमे स्मृते अधमे वाचिके प्राहुः सर्व
मंत्रेषु वै द्विजाः वाचिकस्यैकमेकं स्यादुपांशोः शतमुच्यते सहस्रं मानसः प्रोक्तो मनुविष्णुनारदैरिति ध्यायेच्च मनसा मं
त्रं जिह्वोष्ठौ न विचालयेत् न कम्पयेच्छिरोग्रीवां दंतान्नैव प्रकाशयेत् योगीश्वरवचने मानसजपविषयं अथ जपमाला
तत्र शंखः सुवर्णमणिमुक्ताफलस्फाटिकपद्माक्षेंद्राक्षपुत्रजीवकानामन्यतमामक्षमालां कुर्यात् कुशाग्रग्रंथिकृतां वाह
ल्लीयपर्वभिर्वा गणयेदिति आचारादर्शे सुवर्णस्फाटिकैर्द्राक्षपुत्रजीवसमुद्भवैः अक्षमाला हि कर्तव्या प्रशस्ता स्मृतिरोत्तरेति
हारीतः शंखविद्रुममयी माला तथैवांगुलीपर्वभिः पुत्रजीवमयी माला शस्ता वै जपकर्मणि स्कंदे सौवर्णरजतैस्ताम्रैः स्फाटि
टिकै रत्नकैस्तथा अरिष्टैः पुत्रजीवैश्च शंखपद्मैस्तथा मणिः कुशग्रंथिं च रुद्राक्षमक्षमेवोत्तरोत्तरं हारीतः शतं स्याच्छंखमणि
भिः सहस्रं स्वर्णधातुभिः स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं तु पुत्रजीवकजपेन परिसंख्यानविय

॥

ते कुशाग्रेण्यावरुद्राक्षैर्मणिभिर्नासेव्यामाह प्रजापतिः अष्टोत्तरशतेनामाला उत्तमा सा प्रकीर्तिता: चतुःपंचाशिका वत्स मध्यमा
सा प्रकीर्तिता अधमा शोडशतेनित्यं सप्तविंशतिसंख्यया इति ब्रह्मपुराणे अजमासमरेखावपरिशुण्डोद्दानवा निखिलाग्रंथि
नावेगाग्रन्थामेद्रछिवर्जिता सशह्र्वेवलायातत्रुटितापाग्रंथिसंयुता भिन्नसूत्रेणग्रथितापाखंडस्यपुरीततनी मालाडःखप्रदा
षिवोग्रंथितानिपतेत्तभिः पाखंडस्पतिषछीसंवेयेइतितेनपाखंडसंवेपिनीपुरातनीत्यर्थः उमामाहेश्वरसंवादे अक्षिशैवा
विकमेस्यः संलिप्तः सर्वपातकैः नासौलिप्यतिपापेनरुद्राक्षस्यतुधारणात् लक्षेनस्पर्शनेपुण्यंकोटिर्भवतिवाननात्
दशकोटिसहस्राणिधारणाल्लभतेफलं लक्षकोटिसहस्रस्यलक्षकोटिशतस्यच जपेनलभतेपुण्यंनात्रकार्याविचारणा
त् योगियाज्ञवल्क्यः अभावेनत्वमालायाः कुशाग्रेण्यावपाणिना जपएवहिकर्तव्यः एकाग्रमनसामदेति पाणिनाकथं
जपःकार्यः इत्याशंक्याह सएव अनामिकायामध्येवमध्यायःप्रक्रमेणतु तर्जन्यादिगतोतेवअक्षमालाकरेस्थिता
इत्यस्यार्थः अनामिकायामध्यास्थितोरेखोआदिकृता तदयःक्रमेणप्रदक्षिणावर्तेतर्जन्यादिमतोतेवाक्षमालाकरेस्थिते
ति कर्तव्येतीयंकरेस्थितामालाभवति एवंसतिमध्यमायोग्राधपर्वद्वयेवर्जमित्यवगम्यते मध्यमादिद्वयेजपकालेतुव
र्जयेत् एवंग्रहेविजानीयेहृषतेब्रह्मणास्वयंइति तेनोक्तेनतथातर्जन्यानस्पर्शेत् सूत्रेनकंपयेत्रयजपेत् अंगुष्ठस्यतुम

से॰टी॰
२८

ध्यसंध्यपरिवर्तसमाचरेत् इतिपरिवर्मचालने अंगुष्ठाग्रेणयजमेयजमेमेरुलंघने अमेरुणानेनयजमेनतत्सर्वंनिष्फलंभवेत्
गौतमः अंगुष्ठेमोक्षदेविद्यात्तर्जनीशत्रुनाशिनी मध्यमायनकामायानामिकापौष्टिकीमता कनिष्ठारक्षणीप्रो
क्ताजपकर्मणिशोभना अंगुष्ठेनतथाजप्यमन्यैरंगुलिभिःसह अंगुष्ठेनतथाजप्येकृतेतदफलंभवेत् इति ब्रह्मपुरा
णे अंगुष्ठेनजपेन्मोक्षेतर्जन्याअभिचारके मध्यमायनसंपत्तिःशांतिपुष्टिरनामिकेति गौतमः अनेनविधिनायस्तु
जपेकुर्यात्प्रयत्नतः प्रसन्नोविपुलान्भोगान्भुक्त्वामुक्तिंचविंदति इति पूर्वोक्तप्रकारेणजपंविधायसूर्यप्रदक्षिणांकु
र्यात् तथाचव्यासः विश्वतश्चक्षुनेनगायत्र्याजपनेनच यथाशक्तिजप्येनब्रह्मासमर्पयेत्ततःरविः उत्तरेशिखरेजाता
भूम्योपर्वतवासिनी ब्राह्मणैःसमनुज्ञातागच्छदेवीयथासुखंइति गायत्रींविसर्जयेदिति हारीतः सूर्यस्यात्मावर्ते
ति अस्यार्थः गायत्रीजपानंतरं सूर्यस्याहन्नन्वावर्ते इति मंत्रेणसूर्यप्रदक्षिणंकुर्यात् प्रदक्षिणीकरोति तथाहमेवस्
यंतदेवानकुर्यामिति तदनुवर्तनेन········ मेफलेप्राप्नोमीत्यर्थः अत्रान्वावर्ते इति उत्तमपुरुषैकवचने एतेन्मंत्रस्या
सूर्यऋषिर्यजुश्छन्दः सूर्योदेवतासूर्योपस्थानेतिविनियोगः इति गायत्रीजपानंतरंकमशाखिब्रह्मयज्ञंकुर्यात् तत्स्व
रूपमाह्निकेदोगपरिशिष्टे यच्चक्रतिजपःप्रोक्तोब्रह्मयज्ञःसउच्यते सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः वैश्वव

सानेवानाम्नत्रैर्नैनिमित्तिकादितिकतेनिमित्तकादिति अस्यार्थः अन्येनामित्तिंन संभवे पूर्वोक्तकालादन्यत्राकार्य इति यो
गीश्वरः आदावारभ्य वेदंतस्ताध्याय यथा परिक्रमात् यदधीतेन्वहं शक्त्या सस्वाध्याय इतिस्मृतः तदनुष्ठानमाह शौनकः
ग्रामाद्वोदग्वा ग्रामान्निः क्रम्याप्लुत्यशौचयज्ञोपवीत्याक्लिन्नवासदर्भानां येसकलोत्तेषु प्राङ्मुख उपविश्योपस्थानेकृत्वादक्षि
णोत्तरौपाणीसंधायपवित्रवंतौ द्यावापृथिव्योः संधिमीक्षमाणः संमील्यवायथायुक्तमात्मानंमन्येततथायुक्तोऽधीयीत
स्वाध्यायं ॐपूर्वाव्याहृतिः सावित्रीमन्वाह यश्चाद्यार्थवेदाः सर्वामितिन्नतीयकं यावन्मन्येतावदधीत्येतयापरिदधातीति
नमोब्रह्मणइति अक्लिन्नवासा अनार्द्रवासा उत्तीर्यप्रागग्रैः कुशैर्निविडरमासनेकृत्वा उपस्थमुपस्थाकृतिपादद्व
येकृत्वा यथावायुक्तमात्मानंमन्येतयथासमाहितमात्मानंमन्येततथास्वाध्याये तदेवमधीयीत पठेत् ॐकारश्च
वैव्याहृतिः सावित्रीपादमर्धं सर्वांवापठेत् अथवावेदेषुयावत्परिमितिमध्येतमन्येत इत्युक्तेतावदधीत्य नमोब्रह्मणे
इत्येतयाऋचापरिदधातिपरिधानंत्रिपठने एवं वायमर्थउक्तोभवति सकलनिगमाध्यायिनादिमारभ्यवेदपाठेन
ब्रह्मयज्ञः कार्यः तदेकदेशाविदानविआदित्यनवाकपुरुषसूक्तशिवसंकल्पमंडलब्राह्मणयन्मतमपाठेनब्रह्मय
ज्ञः कार्यः गायत्रीमंत्रविदानव्याहृत्यादिनाप्रणवादिनोवेति अन्यापि पुराणेतिहासानियविज्ञाणिब्रह्मयज्ञासि

ध्यर्थैर्पाठेन तथा च याज्ञवल्क्यः वेदाथर्वणोपनिषदः सेतिहासानि शक्तितः जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं ज
से॰टी॰ पेत इति यदि तर्पणात्पूर्वं ब्रह्मयज्ञः संभवः तदा मनुष्ययज्ञानंतरमेव कार्य्यः कूर्मपुराणे यदि स्यात्तर्पणादर्वाक्
२७ ब्रह्मयज्ञः कृतो न हि कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेदिति स च ब्रह्मयज्ञो ग्रामाद्बहिरेव प्रशस्तो यदि
प्रातराहुतेः पश्चात्क्रियते अपां समीपे नियतो नैत्यकं वि[illegible]मास्थितः सावित्रीमप्यधीयीत गत्वारण्ये समाहितः इति
स्मृतेः श्रुतिरपि ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां वोदित आदित्य इति अत्रोदित्य इत्या
भिधानात्सूर्योदयानंतरं सकलाहः प्रशस्तो निमितो न तु यथा परणपगमने वै वाशेषेभ्यो वेदाभ्यासो हि ये च या मनुः
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि
चाफला तथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु
गच्छति सान्वयः शंखलिखितौ नष्टस्वेशातवत्कुर्यात्नमामधीत्यानो विद्यामधीयीतान्यत्र वेदांगस्मृतिभ्यः व्यासः
श्रुतिस्मृतिश्च विप्राणां नयने देवनिर्मिते काणः स्यादेकया हीनो द्वाभ्यामंधः प्रकीर्त्तितः मनुः तयोर्विशेषैर्विविधै
र्व्रतैश्च विविधैर्नोदितैः वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मना योगीश्वरः वेदाधीतो न येच्छुद्धिं प्रशस्तो नरकः पदः

नयेन्नष्टेनयेन्नवर्गेषुनराहृनिलक्षणे अक्वाद्यमप्यधीयीतमार्गेणोक्तेनयर्मवित् नतोवचनरीवेदानन्यायेनकदाचन
ब्रह्मयज्ञस्तुनत्नातमधीयीतादवाप्नुयात् सब्रह्मलोयमेयुक्तोनरकेप्रतिपद्यते मनुः ऋग्यजुः सामवैकेवध्यायतो
यिगतोद्विजैः पात्रतमापादायनक्रमेणसवह्वपि योगिध्वरः नासैयममधीयीतानारयंतिकदाचनः ऋगेकसैयमस्य
स्यधीतोनारयिदपि अमायात्रियध्यान्समाग्रायोमधुच्छनेयपः नश्पंतिपात्रदोर्वल्यात्तरसाभोजनेनतथा इतिवेदप्रशं
सा तत्रकर्मपुराणे व्याससंहितायांवेदार्थप्रशंसार्थं नवेदपाठमात्रेणसंतोषंकारयेद्बुधः पाठमात्रवसानस्तुपं
केगौरिवसीदति योधीत्यविधिवद्वेदंवेदार्थंनविचारयेत् ससान्वयः शूद्रसमः पात्रतांनोपपद्यते व्यासः वेदस्याध्य
यनेसर्वेयमेषामस्यचापियात् अज्ञानतार्थंतत्सर्वंतुषाणांकण्डनेयथा यथाहिभारसंवाहीनतस्यभजनेफले द्विज
स्तथार्थंनभिज्ञोनवेदफलमश्नुते तथापाठमात्रवतोनित्यंद्विजातौ स्यार्थवर्जितान् अनेनकोल्केवलमपिसफलताय
कल्पिते हृहयमः स्याणुरप्यंभारतमाह्नः किलाधीत्यवेदनविवेदयोर्थंयोर्थवित्सकलभद्रमश्नुतेनाकमेतिज्ञानवि
धूतपाप्मेति व्यासः योधीतेनार्थंतत्त्वज्ञस्तस्यतद्धारहेतुणोयथा भारवाहीवभृतकः केवलंक्लेशभाग्भवेत् तस्मादर्थं
परिज्ञानेयत्नः पीयोविजाननः ज्ञानेकर्मचसंयुक्तेमन्त्रार्थंकथितेमया अधीतेक्रतिसंयुक्तंयुक्तेश्रेष्ठेनकेवलम्

अधीत्य यत्किंचिदपि वेदार्थाधिगमे रतः स्वर्गलोकमवाप्नोति धर्मोनुष्ठेर्विद्विजः वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वस
सं॰टी॰ २८ न् इहैव लोके तिष्ठन्वै ब्रह्मभूयाय कल्पते सम्यक् चिंतेत्लोकमप्येकेनाधीतं विशिष्यति चतुराममपि वेदानां केवलाध्ययना
द्विजः तथा अन्नेभ्यो ग्रंथिनः श्रेष्ठा ग्रंथिभ्यो धारिणो वराः धारिभ्यो ह्यर्थतत्त्वज्ञास्तेभ्योप्यध्यात्मचिंतकः इति वेदार्थप्रसं
शा ऋष्यर्षिदेवताछंदोब्राह्मणविनियोगज्ञानप्रशंसा तत्र योगीश्वरः यस्तु जानाति तत्त्वेन आर्षं छंदश्च दैवतम्
विनियोगं ब्राह्मणं च मंत्रार्थज्ञानमेव च एकैकस्य ऋषीणां स वो ध्यातिथिवद्भवेत् देवतायाश्च सायुज्यं गच्छत्य
त्र न संशयः व्यासः एकैकेन प्रकारेण ऋष्यादीन् वेत्ति वै यो द्विजः अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु मंत्रे मंत्रे
प्रयत्नेन ज्ञातव्यं ब्राह्मणेन वै विज्ञाने परिपूर्णे तु स्वाध्यायफलमश्नुते छंदांस्ययातयामानि भवंति फलदानि च
पि श्रियश्च लभते सोत्र धर्ममायुश्च विंदति दिव्यं वर्षसहस्रं तु स्वस्थाने ऋषिभिः सह तिष्ठते तत्र धर्मात्मा तस्यैव
प्रजापतिः योगीश्वरः आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता अविदित्वा तु
यः कुर्याद्यजनाध्ययने जपं होममंतर्जलादीनि तस्य चाल्पफलं भवेत् आपद्यते स्थाणुं गर्त्तं वापि प्रमीयते यात
यामानि छंदांसि भवंत्यल्पफलान्यपि अंतर्जलादिके जप्ये इतरेषामजानतो नाधिकारोस्ति मंत्राणामेवं श्रुतिनिदर्श

२८

ने अल्पमात्रं फलं तस्य होमादन्तर्जलाज्जपात् स्वाध्यायाद्यजनाच्चैव भवते नात्र संशयः व्यासः अविदित्वा ऋषिं छन्दो
दैवतं योगमेव च योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः छन्दोगब्राह्मणमपि यो ह वा अविदितार्षेयच्छन्दोदैवतवि
नियोगेन ब्राह्मणेन याजयति वाध्यापयति स्थाणुं वर्च्छति गर्तं वा पद्यते पापीयान्भवति यातयामानि छ
न्दांसि च भवन्ति अथ यो मन्त्रे वेदे सर्वमाप्नोत्यथ यातयामान्यस्य छन्दांसि भवन्ति तस्मान्मन्त्रे विद्यात् इति योगीश्वरः ऋ
षिणा येन यद्दृष्टं सिद्धिः प्राप्ता च येन वै मन्त्रेण तस्य तत्प्रोक्तमृषिभावस्तदार्षकः छन्दो नाच्छेद उद्दिष्टं वासीदवाकृते
आत्मा संच्छादितो दैवैर्मृत्योर्भवति बिभ्यता आदित्यैर्वसुभिः रुद्रैस्तेन छन्दांसि तानि वै यस्य यस्य तु मन्त्रस्य उद्दिष्टा या
च देवता तदाकारं भवेत्तस्य देवता दैवतोच्यते पुराकल्पे समुत्पन्ना मन्त्राः कामार्थमेव च अनेनेदं तु कर्तव्यं विनियो
गः स उच्यते निरुक्ते यस्य मन्त्रस्य विनियोगः प्रयोजने प्रतिष्ठाने स्मृतिश्चैव ब्राह्मणे वाभिधीयते एवं पञ्चविधि
प्रोक्तं जपकाले त्वहं स्मरेत् होमे चान्तर्जले योगे स्वाध्याये याजने तथा यजुर्वेदभाष्यस्मृतः स्वरो वर्णोऽक्ष
रो मन्त्रा तत्प्रयोगार्थ्यमेव च मन्त्रजिज्ञासमात्रेण वेदितव्यं पदे पदे कात्यायनः वेदार्थतत्त्वज्ञानी च ब्राह्मणो यत्नवा
न्भवेत् यथावध्यस्य सर्वस्य चतुर्वेदसमादकः तस्मान्नायोगी वेदो ब्राह्मणस्याविमात्रे वार्थं सर्वकमध्येतव्यं नके

मे॰टी॰
२९
29

वलेपाठमाहैचमिति महाभाष्येपि दुष्टः शब्दःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाहुः सवाग्वज्रोयजमानंहि
नस्तियथेन्द्रशत्रुःस्वरतोपराधादिति अस्यार्थः इन्द्रस्याभिचारंत्वष्टारब्धस्तमेवेन्द्रशत्रुर्वर्धस्वेति मंत्राभिहतस्तत्रश
त्रुर्वर्धस्वेतिमंत्राभिहतस्तत्रशत्रुशब्दः शातयितृत्वंग्राह्यितोनक्ववार्थस्तत्रैवइन्द्रस्यशातयिताभवेत्यस्यार्थंज्ञानायतत्पुरु
षायोतके अंतोदात्तेप्रयोक्तव्ये स्वरभिजायवहुव्रीहियोतकआद्युदात्तःप्रयुक्तस्तत्रैवइन्द्रवहत्रस्यशातयितासेपतइ
तिवृत्रामिन्द्रशत्रुशब्दोहवान् स्वरापराधातेद्दमिति तथा यस्तुप्रयुक्तेकुशलोविशेषेशब्दानांयथावद्व्यवहारका
लेसोनेत्यमाप्नोति जयपरत्रयोगयोगाविद्युष्यातिवापशब्दैरिति तथा अविद्वांसःप्रत्यभिवादेनाम्नायेनप्लुति
विदुःकामंतेषुतुविप्रोष्यस्त्रीष्विवायमहंवदेत् योवाइमांपदतःस्वरतोवावावैवेदधीति मत्वार्त्विजीनोभवतीति अ
तोपि चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोऽस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां२आवि
वेश इति एतद्व्याख्यानपरैःपाणिनीयमतदर्शनश्लोकोनामाख्योनानिपातोपसर्गाःशृंगाणित्रिकालयात् का
येतार्थंनाम्नःपाशब्दःसप्तविभक्तिदाःउरःकंठःशिरोवद्धावृषेःमेकामवर्षणात् महोदेवोमहतायत्नातःसा
दितिवस्कृतिः एकशब्दःसम्यक्ज्ञातःसंप्रयुक्तःस्वर्गेलोकेकामधुक् भवतीति मनुरप्याह यश्चाव्यावा

सं·टी· वै यश्चमीमांसतेधरं तावुभौपुण्यकर्माणौपंक्तिपावनपावनौ भवितः शब्दब्रह्मणिनिष्णातः परब्रह्माधिगच्छ
३० ति इतितथा सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चेन्दुतारकवत्प्रमंडलितो वेदितव्यो ब्रह्मराशिः सर्व
वेदपुण्यफलावाप्तिश्चास्यज्ञानेभवतिमातापितरौवास्यस्वर्गेलोकेमहीयते इत्यलंविस्तरेण महोजिदीक्षितात्मजाकु
ताब्रह्मप्रकाशिकोव्याख्येयंसंध्यामंत्राणांमिश्रेणवनमालिना वेदार्थज्ञानेनशंकाविशावेदार्थवादिना मध्याख्ये
येसमालोकयन्तुतन्दस्मतामम इतिश्रीमहोजिदीक्षिताशिष्यकुरुदेवनिवासिमहेशमिश्रात्मजवनमालिमिश्र
विरचितासंध्यामंत्रव्याख्याब्रह्मप्रकाशिकासमाप्ता शंशुभंहरिः ॥ ❖ ॥ ❖ ॥

30

व्याख्यासं ध्यारोली· ५३८ पडे ३·

संवत् १९३२ मार्ग प्र· २

वासदेव लखारी तस्ये जमा